International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 316-320
© 2021 IJSR
www.anantaajournal.com
Received: 11-07-2021
Accepted: 15-08-2021

**कौशल कुमार साहा**
शोधछात्रः संस्कृत-पालि-प्राकृत-विभागः,
विश्वभारती- विश्वविद्यालयः,
शान्तिनिकेतनम्, पश्चिमवङ्गः भारतः

**Corresponding Author:**
**कौशल कुमार साहा**
शोधछात्रः संस्कृत-पालि-प्राकृत-विभागः,
विश्वभारती- विश्वविद्यालयः,
शान्तिनिकेतनम्, पश्चिमवङ्गः भारतः

# कालिकापुराणे रसनिष्पत्तिः

**कौशल कुमार साहा**

**सारांश**
“वाक्यं रसात्मकं काव्यम्” इति विश्वनाथाचार्येण कृतेन काव्यलक्षणेन काव्ये रसस्य गौरवं संसूच्यते। रसवर्जितं काव्यं मृतमेव भवति। भरताचार्येण यथार्थमुक्तं यत्- “नहि रसादृते कश्चिद्यप्यर्थः प्रवर्तते।” यद्यपि काव्यशास्त्रे रसस्वरूपविषये वैमत्यम् अवलोक्यते, तथापि येन केनापि प्रकारेण रसस्य सत्त्वं महत्त्वञ्च स्वीक्रियते एव। रसरुपानन्दं विना काव्ये कस्यचनापि प्रवृत्तिर्न संभवति। तस्मात् मम्मटाचार्येण सद्यः परनिर्वृत्तिः काव्यस्य मुख्यं प्रयोजनं मन्यते। अयं रसः काव्यस्य आनन्दतत्त्वम्। रससौन्दर्यवलाद् कालिकापुराणम् सहृदयग्राह्यं भवति। पुराणेऽस्मिन् केन प्रकारेण कविना व्यासदेवेन रससौन्दर्यं प्रतिफलितं तद् शोधप्रबन्धेऽस्मिन् मया प्रदर्श्यते।

**कूटपदानि:** कालिकापुराणम्, व्यासदेवः, रसः, शृङ्गारः, करुणः, रौद्रः, वीरः, अद्भूतः, सौन्दर्यम्

**प्रस्तावना**

“वाक्यं रसात्मकं काव्यम्” इति विश्वनाथाचार्येण कृतेन काव्यलक्षणेन काव्ये रसस्य गौरवं संसूच्यते। रसवर्जितं काव्यं मृतमेव भवति। भरताचार्येण यथार्थमुक्तं यत्- “नहि रसादृते कश्चिद्यप्यर्थः प्रवर्तते।”[1] यद्यपि काव्यशास्त्रे रसस्वरूपविषये वैमत्यम् अवलोक्यते तथापि येन केनापि प्रकारेण रसस्य सत्त्वं महत्त्वञ्च स्वीक्रियते एव। रसरुपानन्दं विना काव्ये कस्यचनापि प्रवृत्तिर्न संभवति। तस्मात् मम्मटाचार्येण सद्यः परनिर्वृत्तिः काव्यस्य मुख्यं प्रयोजनं मन्यते। अयं रसः काव्यस्य आनन्दतत्त्वम्। सहृदयस्यान्तःकरणे रत्यादयः नव स्थायिभावाः भवन्ति। एतेषाम् स्थायीभावानां उद्भवस्य कारणं काव्ये नाट्ये च विभावशब्देन व्यपदिश्यते। स्थायीभावानामुद्भवात् परं यैः वस्तुभिः तस्य वहिःप्रकाशः भवति, तान्येव वस्तूनि भवन्ति अनुभावाः। एते लोके कार्यशब्देन व्यपदिश्यन्ते। रत्यादीनां स्थायीभावानां सहकारीकारणं भवति व्यभिचारिभावः। इमे व्यभिचारिभावाः लोके सहकारिशब्देन व्यपदिश्यन्ते। एतैः विभावादिभिः अभिव्यक्तः सहृदयस्य स्थायिभावः रस इत्युच्यते। मम्मटाचार्येण यथार्थमुद्घोषितम्-

> “कारणान्यथ कार्याणि सहकारीणि यानि च।
> रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
> विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
> व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥”[2]

पुराणमिदं काव्यसौन्दर्येण समृद्धम्। पुराणेऽस्मिन् नानाविधानि आख्यानोपाख्यानानि वर्तन्ते। कविना व्यासदेवेन एतेषु आख्यानोपाख्यानेषु यथास्थाने निपुणतया रसान् संयुज्य पुराणमिदं सौन्दर्यमण्डितं कृतम्।

**शृङ्गारः**
साहित्यदर्पणकारेण विश्वनाथेन शृङ्गाररसस्य लक्षणे कथितं यत्-

> “शृंगं हि मन्मथोद्भेदस्तदागमनहेतुकः।
> उत्तमप्रकृतिप्रायो रसः शृंगार इष्यते।।” [3]

---

[1] नाट्यशास्त्रम्, पृ. ६३०

[2] का.प्र.-४/२७-२८

[3] सा.द.-३/१८३

कामस्याविर्भावो भवति शृङ्गमिति। कामस्योद्भेदाद् शृङ्गाररसस्योत्पत्तिः जायते। तत्र नायक-नायिकादयः आलम्वनविभावाः, चन्द्रोदयवनमाला-वसन्तादयः उद्दीपनविभावाः, भ्रूविक्षेपकटाक्षादयोऽनुभावाः, लज्जौत्सुक्यादयश्च व्यभिचारिभावाः भवन्ति। एतैः विभावानुभावव्यभिचारिभावैः अभिव्यक्तः रतिरूपः स्थायीभावः शृङ्गारः रसः।

संस्कृतवाङ्मये शृङ्गाररसस्य प्राज्यं स्थानं वर्तते। कालिदास-माघादयः महाकवयः अपि तेषां रचनायां अस्य रसस्य यथायथं सुप्रयोगं चक्रुः। कविना व्यासदेवेनापि शृङ्गाररसस्य साधुसंयोजनेन पुराणस्यास्य साहित्यिकसौन्दर्यमुपचरितम्।

शृङ्गाररसस्य भागद्वयं वर्तते सम्भोगशृङ्गारः विप्रलम्भशृङ्गारश्च। पुराणेऽस्मिन् कविव्यासदेवेन चारुतया द्विविधशृङ्गारस्य मनोहरं चित्रणं प्रस्फुटितम्।

कालिकापुराणस्य १४ तमे अध्याये १५ तमे अध्याये च शिव-सत्योः प्रेममूलकः विहारः वर्णितोऽस्ति। तयोः वैवाहिकोत्तरं प्रेम अत्र प्रदर्शितम्। शिवः सतीदेव्याः पाणिग्रहणात् परं तया साकं हिमालयप्रस्थं जगाम। महादेवः अत्र सतीदेव्या सह उपांशु चिरं मैथुनं चकार। शङ्करः कदाचिद् वन्यपुष्पाणि समाहृत्य मनोरमं माल्यं विधाय दाक्षायण्याः हारस्थाने नियोजयत्। दर्पणे यदा सती देवी निजवक्त्रं वीक्षन्ती तदा हरः सतीदेवीमनुगम्य निर्जने निजमुखं प्रादर्शयत्। कदाचित् सतीदेव्याः कुन्तलान् बबन्ध मोचयामास मार्जयामास च। महादेवेन अनुरागवशात् तस्याः लोहितचरणयुगलं यावकरसैः अधिकरञ्जितं कृतम्।

> "कदाचित् कुन्तलांस्तस्या उल्लास्योल्लासमागतः।
> बध्नाति मोचयत्येवं शश्वत्सन्मार्जयत्यपि॥
> सरागौ चरणावस्था यावकेनोज्वलेन च।
> निसर्गरक्तौ कुरुते सरागो वृषभध्वजः॥"[4]

शिवः अन्येषां समक्षे उच्चैः स्वरैः तथा द्रुततया आख्येयाः कथाः दाक्षायण्याः मुखमण्डलं स्प्रष्टुं तस्याः कर्णे विलम्बेन अकथयत्। महादेवः दूरं न गत्वा अपि अन्यमनस्कायाः सतीदेव्याः पश्चाद्भागे सयत्नं धीरतया आगम्य तस्याः लोचनद्वयमनुबध्नाति। पुनः सः मायया अन्तर्हितः सन्नपि सतीमाशिश्लेष। शङ्करः सुवर्णकमलकलिकातुल्ये कुचद्वये कस्तुर्या भ्रमराकारं चकार च। सतीदेवीं विना महादेवः क्षणमपि स्वस्तिं नालभत।

> "न याने नोपवेशे च न स्थितौ नापि चेष्टिते।
> तया विना क्षणमपि शर्म लेभे वृषध्वजः॥"[5]

नवदम्पती कैलाशस्य गिरिकन्दरे बहुकालं विहृत्य हिमालयस्य महाकौषीप्रपातं जगाम। महादेवे हिमालये प्रविष्टे मित्रेण वसन्तेन स्त्रिया रत्या सह कामोऽपि तत्र जगाम। ततः वृक्षाः सुपुष्पिताः लताः कुसुमिताश्च अभवन्। सरोवरे कमलानि प्रस्फुटानि कमलेषु भ्रमराः गुञ्जरिताश्च अभवन्। कुसुमिताभिः लवङ्गलताभिः सुरभितः वायुः कामिजनानां चित्तं सम्मोहयति। दाक्षायणी देवी सम्भोगविषये महादेवस्य अतीव प्रिया सती मधुरं शृङ्गाररसं पाययितुं महादेवस्याङ्गे प्राविशत्।

> "संभोगविषये देवी सती तस्य मनःप्रिया।
> विशतीव हरस्याङ्गे पाययन्तीव तद्रसम्॥"[6]

अस्यां वर्णनायां संभोगशृङ्गारस्य विविधानि उपादानानि दृश्यन्ते। शिवस्य रत्योत्पत्तेः सती आलम्बनविभावः, पुनः सतीदेव्याः रत्योत्पत्तेः महादेवः आलम्बनविभावः। हिमालयप्रस्थे वर्षाऋतोः परिवेशः महाकौषीप्रपाते वसन्तऋतोः परिवेशश्च उद्दीपनविभावो भवति।

शृङ्गारास्वादने ऋतोः विशिष्टा भूमिका वर्तते। ऋतोः परिवेशेन कामिजनानां चित्ते कामरागः जायते। आचार्यभरतप्रणीते नाट्यशास्त्रे शृङ्गाररसस्य विभावालोचनापरिसरे ऋतुः सर्वदा स्वीकृतो भवति। "तत्र सम्भोगस्तावत् ऋतुमाल्यानुलेपना-लंकारेष्टजनविषयवर-भवनोपभोगोपवन-गमनानुभवनश्रवणदर्शनक्रीडालीला-दिभिर्विभावैरुत्पद्यते।" [7] साधारणतः वर्षाऋतुवर्णनेन कविना विप्रलम्भशृङ्गारः वर्ण्यते, वसन्तऋतुचित्रणेन नायिका-नायकयोः सम्भोगशृङ्गारः प्रकाश्यते च। महाकविवाल्मीकिना रामायणस्य किष्किन्ध्याकाण्डे वर्षाऋतुचित्रणेन सीतारामयोः विप्रलम्भशृङ्गारस्य वर्णनं कृतम्। महाकविकालिदासेनापि 'मेघदूतम्' इति गीतिकाव्ये वर्षाऋतुवर्णनेन विप्रलम्भशृङ्गारस्य वर्णनं कृतम्। परन्तु महाकविशूद्रकेन मृच्छकटिकप्रकरणस्य पञ्चमाङ्के वर्षाणां मनोहरवर्णनेन नायक-नायिकयोः सम्भोगशृङ्गारस्य उद्दीपना वर्णना कृता-

> "गर्ज वा वर्ष वा शक्र मुञ्च वा शतशोऽशनिम्।
> न शक्या हि स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति॥"[8]

अस्माकं कविः व्यासदेवोऽपि वर्षाऋतोः वर्णनेन सती-शिवयो शृङ्गारत्मकं सौहार्दमुपवर्णयति। महाकविना कालिदासेनापि 'कुमारसम्भवम्' महाकाव्यस्य तृतीयसर्गे वसन्तऋतोः मनोमुग्धकरा रमणीया वर्णना प्रख्यापिता।

> "चूताङ्करास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज।
> मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य॥"[9]

शिव-सत्योः अनुभावावस्थाः कविना सुचारुतया रमणीयतया प्रदर्शयति। महादेवः जल्पैः अवलोकनैः हास्यैः सम्भाषणैश्च पार्वत्याः हृदि प्रविवेश।–

> "आलापैर्वीक्षणैर्हासैस्तथा सम्भाषणैर्हरः।
> तस्यां विवेश गिरिशः संयमीवात्मसंविदम्॥"[10]

शिव-सत्योः प्रेमवर्णनायाम् आलिङ्गन-केशबन्धनादयः व्यभिचारिभावरूपेण समुपास्थिताः भवन्ति।

> "अन्तर्हितस्तु तत्रैव मायया वृषभध्वजः।
> तामालिलिङ्ग भीत्या सा चकिता व्याकुलाभवत्॥"[11]

कालिकापुराणस्य ४५ तमे अध्याये कविः व्यासदेवः महादेव-पार्वत्योः मधुरं प्रेम्णं चित्रयति। महादेवः अनुरागाद् गिरिजायै पुष्पाणि संगृह्य माल्यमरचयत्। कदाचित् वृषध्वजेन शिवेन दर्पणे युगपत् पार्वत्याः मुखेन सह स्वीयवदनमवलोकितम्। कदापि कस्तुर्य्या चन्दनलेपनैः पार्वत्याः घनस्तनयुगले चित्रमङ्कितम्। पुनश्च चन्दनलेपनैः तस्याः ललाटे मनोहरचन्द्रवत् तिलकं कृतम्। महादेवेन यदा चन्दन-अगुरु-कस्तुरी-कुंकुमानां विलेपनैः पार्वत्याः केशपाशेषु विविधचित्रमङ्कितं तस्मिन् समये तस्याः केशपाशाः नृत्योद्यतामयूरस्य पुच्छतुल्यं रमणीयं प्रतिभातम्। कदापि सुवर्णमयाः उत्कृष्टाः अलंकाराः पार्वत्याः देहे अर्पिता महादेवेन। अनेन विविधरत्नमयैः दिव्यालंकारैः मनोहरवस्त्रेण च भूषिता काली प्रकृतेः तुल्या रमणीया प्रतिभाति।

> "पुष्पाणि क्वचिदाहृत्य गिरिजां प्रति शङ्करः
> सर्वाङ्गसङ्गिनीं मालां विदधेऽतिमनोहराम्॥
> कदाचिदादर्शतले युगपच्चात्मनो मुखम्।
> मुखं तथैवापर्णायाः वीक्षाञ्चक्रे वृषध्वजः॥"[12]

---

[4] का.पु.- १४/१७-१८

[5] का.पु.- १४/२९

[6] का.पु.- १४/५२

[7] नाट्यशास्त्रम्, पृ. ७११

[8] मृच्छकटिकम- ५/३१

[9] कुमारसम्भवम्- ३/३२

[10] का.पु. १४/५४

[11] का.पु.- १४/२१

[12] का.पु. ४५/३६-३७

"गन्धसारविलेपेन तिलकान्यम्बिकातनौ।
ललाटे चाकरोच्चारु चन्द्रवद्धनसन्धिषु।।"[13]
"सर्वैर्दिव्यैरलङ्कारैर्नानारत्नैः संदशुकैः।
सम्पूर्णमण्डिता काली सादृश्यं प्रकृतेर्दधौ।।"[14]

अनेन व्यासदेवेन पुराणेऽस्मिन् सम्भोगशृङ्गारस्य चारुतया वर्णनं समुपस्थापितम्। पुराणेऽस्मिन् नायक-नायिकयोः विप्रलम्भशृङ्गारस्य वैचित्र्यं कविना संनिहितमस्ति। यत्र प्रवला रतिः अभीष्टम् अर्थात् नायकं नायिकां वा न प्राप्नोति तत्र शृङ्गारः रसः भवति विप्रलम्भ इति। दर्पणकारस्य भाषायां-

" यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।"[15]

अयं विप्रलम्भः चतुर्विधः – पूर्वरागात्मकः, मानात्मकः, प्रवासात्मकः, करुणात्मकश्चेति।
श्रवणेन दर्शनेन वा परस्परं प्रति जातः रागः यदि परस्परं न प्राप्यते तर्हि नायकस्य नायिकायाः वा या दशा-विशेषा जायते सैव पूर्वराग उच्यते। दर्पणकारस्य भाषायाम्-

"श्रवणाद्दर्शनाद्वापि मिथः संरुढरागयोः।
दशाविशेषो योऽप्राप्तो पूर्वरागः स उच्यते।।"[16]

ब्रह्मणः आदेशेन कामदेवः तस्य हर्षबाणेन ध्यानस्थस्य महादेवस्य हृदयं बबन्ध। पुनः मोहबाणेन महादेवः भृशं मोहितः वभूब। अनन्तरं वृषध्वजः सहर्षं दाक्षायणीं प्रति वारं वारं भवस्व मम भार्येति प्राह। अनन्तरं चारुहासिनी सती कामभावापन्नस्य महादेवस्य सकाशे निजहावान् भावान् च प्रकट्य महादेवं वारं वारं 'पितुर्मे गोचरीकृत्य मां गृह्णीष्व जगत्पते।।'[17] इति प्राह। तत्परं दाक्षायणी शम्भुं समाश्वास्य हर्षमोहसमन्विता दाक्षायणी मातृसमीपं जगाम। महादेवः हिमालयप्रस्थस्य निजाश्रमं प्रविश्य दाक्षायणीविरहजनितेन दुःखेन ध्यानपरायणो अभवत्।–

"हरोऽपि हिमवत्प्रस्थं प्रविश्य च निजाश्रमम्।
दाक्षायणीविप्रलम्भदुःखाद् ध्यानपरोऽभवत्।।"[18]

अस्य पुराणस्य ४५तमे अध्याये कविना मानविप्रलम्भस्य चित्रमङ्कितम्। मानः भवति कोपः। अयं मानः द्विविधः प्रणयमानः ईर्ष्यामानश्च। प्रेम्णः कुटिला गतिः, तस्मात् प्रभूतानन्दविद्यमानत्वादपि कारणेन विना नायक-नायिकयोः यः कोपः सैव भवति प्रणयमानः इति।

"मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः।
द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि।।
प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना।"[19]

पत्युः अन्यप्रियासक्तिः दर्शनेन अनुमानेन श्रवणेन च रमणीगणानाम् ईर्ष्यामानः जायते।
-

"पत्युरन्याप्रियासङ्गे दृष्टेऽथानुमिते श्रुते।
ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा।"[20]

महादेवः विवाहाद् परं हिमालयपर्वतस्य सानौ कुञ्जे कन्दरेषु च पार्वत्या सह दाम्पत्यं प्रेमायापयत्। एकदा कैलासपर्वतस्य अग्रे उमया सह सानन्दं रममाणकाले महादेवः रूपयौवनसम्पन्नाः सर्वलक्षणसंयुता रमणीः ददर्श। तासां उर्वशी अत्यन्ता मनोहरा बभूव। लालिमायुक्ताः गौराङ्ग्यः सर्वालंकारभूषिताः अप्सरसः मुनीनामपि चित्तं मोहयितुं शक्ताः आसन्। महादेवः एतासाम् अप्सरासां सकाशे उमां काली इति प्राह। अपि च उर्वश्याद्यप्सरोभिः सम्भाषणार्थमाह।

"कालि भिन्नाञ्जनश्यामे उर्वश्याद्यप्सरोगणैः।
त्वयेह स्त्रीस्वभावेन संलाप- क्रियतामिति।।" [21]

पार्वती महादेवस्य एवंविधं वाक्यमाकर्ण्य क्रोधान्विता सती वृषध्वजं परित्यज्य हिमालयस्य अज्ञातं शैलशिखरं जगाम। अनन्तरं विरहव्याथितः सन् महादेवः पार्वत्याः अन्वेषणं चकार। पार्वती हरं विरहव्याकुलं ज्ञात्वा गुप्तगिरिसानौ आत्मानं दर्शयामास। शङ्करः तां आलिङ्गितुमुद्यतः अभवत्, परन्तु उमा तं निवारयामास। शङ्करः पार्वत्याः वियोगेन विशीर्णः जातः। महादेवः मानसिकशान्तिमपि नालभत।

"तामासाद्य ततः शम्भुः किमर्थमभजः प्रिये।
"मानं मनोनुदं देवि विशीर्ण इव चाब्रवीत्।।"[22]
"तदाचक्ष्व द्रुतं कान्ते मनो मे न प्रसीदति।।"[23]

अनेन कविना हर-पार्वत्योः मानविप्रलम्भः सफलतया पुराणेऽस्मिन् चित्रितम्।

**करुणरसः**

इष्टनाशेन अनिष्टप्राप्त्या करुणरसः उत्पद्यते। रसस्यास्य वर्णः कपोतः देवता यमश्च । साहित्यदर्पणकारस्य अभिमतेन-

"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः।।"[24]

प्रियजनस्य मृत्युतः पीडातश्च करुणरसः प्रसूयते। पुराणेऽस्मिन् महाकविना व्यासदेवेन करुणतया अस्य रसस्य परिवेषणं कृतम्। अत्र १६ तमे अध्याये विजयायाः करुणः विलापः वर्णितः अस्ति। दक्षः शिवं कपालीति दाक्षायणीं कपालिभार्येति विनिश्चित्य तस्य यज्ञे तयोः आमन्त्रणं नाकरोत्। अतः दाक्षायणी क्रोधान्विता सती पूर्वकथानुसारं योगेन निजशरीरस्य नवद्वाराणि आवृत्य विस्फोटं चकार। अनेन महता विस्फोटेन तस्याः प्राणवायुः दशमद्वारं ब्रह्मरन्ध्रं संभिद्य स्वयमेव वहिरागतः वभूव। अन्तरिक्षस्थिताः सर्वाः देवताः तामवलोक्य शोकविह्वलाः सत्य हाहाकारं चक्रुः। अनन्तरं दाक्षायण्याः भगिनीसुता तत्र आगत्य तां मृतां दृष्ट्वा वारं वारमार्तनादं चकार।–

"हा सती क्व गतासीति हा सती तव किन्विदम्।
हा मातृष्वसरित्युच्चैस्तदा शब्दो महानभूत्।।"[25]

विजया करुणं विलपन्ती करतलैः सतीदेव्याः मुखं मार्जयामास जघ्नौ च। नयनजलैः दाक्षायण्याः वक्षस्थलं वदनमण्डलं सिञ्चन्ती, पाणिभ्यां केशपाशमुल्लास्य वारं वारं मुखम् अनुवीक्षन्ती विजया।
पुराणस्यास्य १७ तमे १८ तमे चाध्यायद्वये करुणरसस्य वेदनावृतं वर्णनं कृतम्। महादेवः दाक्षायण्याः समीपे आगत्य तां मृतां ज्ञात्वाऽपि स्नेहात् न जहौ। वदनमण्डलं निरीक्ष्य मुखं मार्जयन् शिवः मुहुः प्राह 'कस्मात् सुप्तासीत्येवम्' इति। अनन्तरं

13 का.पु. ४५/३९
14 का.पु. ४५/४४
15 सा.द. ३/१८७
16 सा.द.- ३/१८८
17 का.पु.- १०/१९
18 का.पु.- १०/२३
19 सा.द.- ३/११८-११९
20 सा.द.- ३/१९९-२००
21 का.पु. ४५/५३
22 का.पु.- ४५/६०
23 का.पु. ४५/६२
24 सा.द.- ३/२२२
25 का.पु.- १६/५२

विजयामुखात् सर्वं वृत्तान्तं परिज्ञाय शोकव्याकुलः शङ्करः दःखविदीर्णः सन् साधारणमनुष्यवत् चुक्रोश। सतीदेव्याः गात्रं हस्तेन संसर्ज्य यथास्थितान् अलंकाराण् उन्मोच्य पुनः यथास्थाने संस्थापयामास। महादेवे एवं कृते अपि यदा मृता सती किञ्चन नोवाच तदा भर्गः शोकवेगेन भृशं रुरोद। अनन्तरं शोकविमूढचित्तः वृषध्वजः सतीदेव्याः शवदेहं स्कन्धे नीत्वा विलपन् प्राच्यदेशं जगाम।

"अथ शोकविमूढात्मा विलपन् वृषभध्वजः।
जगाम प्राच्यदेशांस्तु स्कन्धे कृत्वा सतीशवम्।।"[26]

अस्यां वर्णनायां आलम्बनविभावः भवति सतीदेवी। विजयायाः महादेवस्य च मानसिकमर्मवेदना भवति उद्दीपनविभावः। विलपनं भवति अनुभावः। विजयायाः चेतनहीनता महादेवस्य व्याकुलता, सतीशवस्य अलंकारैः सज्जीकरणादिकार्यं च व्यभिचारिभावः इति। अनेन प्रकारेण कविना व्यासदेवेन ऐकान्तिकोपादानेन करुणः रसः वर्णितोऽस्ति।

**रौद्ररसः**

कालिकापुराणस्य कियत् स्थाने रौद्ररसस्य सुषमं वर्णनं कृतम्। अस्य पुराणस्य १७ तमे अध्याये विजयामुखात् सतीदेव्याः मृत्योः कारणं ज्ञात्वा शङ्करः कोपाद् उद्दीप्ताग्निरिव वभूव। क्रोधान्वितस्य शिवस्य कर्ण-नासिका-नेत्र-मुखेभ्यः असङ्खेयाः स्फुलिङ्गाः वहिर्गताः आसन्। एवं मन्यते यत् कल्पान्ते सूर्यकिरणेभ्यः सङ्ख्यातीताः उल्काः विनिः सृताः इति।

"इति श्रुत्वा वचस्तस्या विजयायाः वृषध्वजः।
अतीव कोपादुत्तस्थौ दिधक्षुरिव पावकः।।"[27]
"तस्य कोपपरीतस्य कर्णनासाक्षिवक्त्रतः।
घोरा जलन्त्यः कणिकाः सृजन्त्योऽग्नेर्महारवम्।
उल्का विनिः सृता बह्व्यः कल्पान्तादित्यवर्चसः।।"[28]

महादेवः अनन्तरं दक्षस्य यज्ञस्थले आगत्य महाधनसम्पन्नं पात्र-युपादिभिरावृतं यज्ञं ददर्श। तत्र उपस्थितान् सर्वान् देवान् दिक्पालान् पाथिर्वान् प्राणिनश्च अवलोक्य महादेवः क्रोधान्वितः सन् दक्षस्य यज्ञं ध्वंसार्थं वीरभद्रं प्रेषयामास। सर्वदेवगणावृते विष्णौ वीरभद्रं निवारिते क्रोधसंरक्तलोचन-महादेवः स्वयं यज्ञशालां प्रविश्य तद् यज्ञं विननाश।

"तं वार्यमाणं दृष्ट्वैव क्रोधसंरक्तलोचनः।
स्वयं विवेश तं यज्ञं ध्वंसयामास चेश्वरः।।"[29]

सर्वादौ भर्गदेवे महादेवं निवारितुमुद्यते सति महादेवः क्रोधात् अङ्गुल्याग्रप्रहारेण तस्य लोचनद्वयं विनष्टं चकार। अनन्तरं शङ्करः दिवाकरं करेण दूरं चिक्षेप। पुनः सहस्यं मार्तण्डमवलोक्य वृषध्वजः करप्रहारेण तस्य दन्तान् मुखात् पातयामास। दन्तहीनं सूर्यं नेत्रविहीनं भगदेवमवलोक्य सर्वे देवाः ऋषयः अन्ये च दुद्रुवः।
उपवर्णनेऽस्मिन् रौद्ररसस्य अपरिहार्याणि उपादानानि कविना साधुतया संयोजितम्। अस्य रसस्य स्थायिभावः क्रोधः, रक्तः वर्णः देवता रुद्रश्च। अत्र शत्रुर्भवति आलम्बनविभावः, तस्य चेष्टा भवति उद्दीपनविभावः मुष्टिप्रहार-आक्रमण-विरुद्धाचरणसंग्रामदिभिः अस्य उद्दीप्तिः प्रगाढा भवति। भ्रकुटि-ओष्टदंशन-वाहुस्फोटन-तर्जन-अस्त्रक्षेपणादयः भवन्ति अनुभावाः। उग्रता-आवेग-रोमाञ्च-स्वेद-मद-मोह-अमर्षादयः भवन्ति व्यभिचारिभावाः। साहित्यदर्पणकारेण उक्तं यत्-

"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्।।
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा।।
भ्रविभङ्गौष्टनिर्दंशवाहुस्फोटनतर्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।।
उग्रतावेगरोमाञ्च-स्वेदवेपथवो मदः।
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः।।
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः।"[30]

अत्र शिवस्य क्रोधः स्थायिभावः, दक्षादयः देवाः आलम्बनविभावाः, विष्णु-भग-दिवाकराणां क्रियाकलापाः उद्दीपनविभावाः, आक्रमण-विनाशादयः अनुभावाः। यथा भगस्य लोचनविनाशनं दिवाकरस्य उत्क्षेपणञ्च। शिवस्य लोचनयोः आरक्तता, शिवस्य उग्रता च व्यभिचारिभावाः भवन्ति।
कालिकापुराणस्य ४२ तमे अध्यायेऽपि कविना रौद्ररसः वर्णितः। कामदेवः यदा महादेवस्य ध्यानभङ्गाय पुष्पबाणं संयुयोज तदा महादेवः क्रोधान्वितः सन् तस्य ललाटस्थितेन तृतीयनेत्रेण कामदेवं ददाह।–

"इति स्म वदतां तेषाममराणां तदानलः।।"[31]
"ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम्।
दग्ध्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।।"[32]
अनेन कविना व्यासदेवेन पुराणेऽस्मिन् रौद्ररसस्य वर्णनं चकार।

**वीररसः**

उत्कृष्टस्य वीररसस्य स्थायीभावः उत्साहः देवता महेन्द्रः वर्णः स्वर्णश्च। विजेतव्यादायः आलम्बनविभावाः, विजेतव्यादेः चेष्टादयः क्रियाकलापः उद्दीपनस्वरूपा, सहाया-अन्वेषणादयः अनुभावाः, धृति-मति-गर्व्व-स्मृति-तर्क-रोमाञ्चादयः सञ्चारिभावाः भवन्ति। विश्वनाथेन कथितं यत्-

"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।।
आलम्बनविभावास्तु विजेतव्यादयो मताः।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरुपिणः।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः।।
संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्।।"[33]

साधारणतः संग्रामवर्णनावसरे अस्य रसस्य प्रयोगः क्रियते। अस्य पुराणस्य ३० तमे अध्याये वराह-शरभयोः संग्रामवर्णनापरिसरे कविना अस्य रसस्य सुप्रयोगः कृतोऽस्ति। वराहगणाः मुखाग्रस्य प्रहारैः खुराघातैः दन्तप्रहारैः भयानकगात्रनिक्षेपैश्च युयुधे। अनेन शरभरूपधारी महान् शिवः एकान्तं वराहगणैः सह सहस्रवर्षं यावत् तुमुलं युद्धं चक्रुः।

"ततस्ते युयुधुः सर्वे पोत्राघातेन पोत्रिणः।
खुरप्रहारैदंष्ट्राभिर्गात्रक्षेपैश्च दारुणैः।।
शरभोऽप्यथ दंष्ट्राग्रैर्नखैस्तीक्ष्णैः खुरैस्तथा।
लाङ्गुलस्य प्रहारैस्तु तुण्डघातैर्महास्वनैः।।
चतुर्भिः पोत्रिभिस्तैस्तु स एकः शरभो महान्।
एकान्तं योधयामास सहस्रं परिवत्सरान्।।"[34]

---

26 का.पु.- १८/३६
27 का.पु. १७/१७
28 का.पु.- १७/१८
29 का.पु.- १७/४२
30 सा.द.- ३/२२७-२३१
31 का.पु. ४२/१७२
32 का.पु.- ४२/१७३
33 सा.द.- ३/२३२-२३४
34 का.पु. ३०/७०-७२

पुराणस्यास्य ४० तमे अध्यायेऽपि वीररसस्य वर्णना दृश्यते। क्षितिपुत्रस्य नरकस्यात्याचारेण इन्द्रादिदेवाः जर्जरिताः आसन्। अनन्तरं भगवान् विष्णु हयग्रीव-नरकादीन् वीरान् असुरान् जघान।–

"एको यो योधयेद्देवान् सहस्रं वत्सरान् पुरा।
शक्रं च समतिक्रम्य महावीरपराक्रमः।
तं जघान हयग्रीवं समतिक्रम्य केशवः।।"[35]
"सुदर्शनेन चक्रेण मध्यदेशे तदा हरिः।
द्विधा चिच्छेद नरकं खण्डितोऽभ्यपतद् भुवि।।"[36]

एवंविधप्रकारेण कविना संग्रामवर्णनेन पुराणेऽस्मिन् वीररसस्य प्रयोगः कृतः।

**अद्भुतरसः**

अस्य रसस्य स्थायिभावः विस्मयः देवता गन्धर्वः पीतवर्णश्च। अलौकिकविषयः अस्य रसस्यालम्बनविभावः, अलौकिकवस्तुनः गुणमहिमा भवति उद्दीपनविभावः स्तम्भ-स्वेद-रोमाञ्च-गद्गद्स्वरादयः अनुभावाः, वितर्क-आवेग-जडता-हर्षादयः व्यभिचारिभावाः भवन्ति।–

"अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।।
पीतवर्णो, वस्तु लोकातिगमालम्बनं मतम्।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः।।
स्तम्भः स्वेदोऽथो रोमाञ्चगद्गदस्वरसंभ्रमाः।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः।।
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः।" [37]

पुराणेऽस्मिन् विविधस्थानेषु पाठकाः अद्भुतरसस्यास्वादनं प्राप्नुवन्ति। यथा ३०तमे अध्याये शरभस्य रुपवर्णनाप्रसङ्गे उच्यते- ऊर्ध्वाधोदेशे अष्टचरणसमन्वितः द्विलक्षयोजनोच्चताविशिष्टः सार्धलक्षैकविस्तृतः आसीत् भयानकः शरभः। तस्य नासिका सुदीर्घा आसीत्। दीर्घवक्त्रयुक्तस्य अष्टदन्तसमन्वितस्य च शरभस्य दीर्घकर्णयुक्तस्य शरभस्य एकः पुच्छोऽपि आसीत्।

"ऊर्ध्वाधोभागतश्चाष्टपादयुक्तः सुभैरवः।
द्विलक्षयोजनोच्छ्रायः सार्धलक्षैकविस्तृतः।।" [38]
"दीघ्रवक्त्रं महाकायमष्टदंष्ट्रासमन्वितम्।
विभ्रतं स-सटं पुच्छं दीर्घकर्णं भयानकम्।।"[39]

सहृदयाः पुराणेऽस्मिन् विविधस्थाने देवानाम् असुराणां च अपार्थिवक्रियाकलापमवलोक्य मुग्धाः भवन्ति। देव-देवीनां विस्मयकरं वर्णनं परिचिन्त्य तेषां मनसि विस्मयभावः जागरितः भवति।

**उपसंहृतिः**

अस्माकं कविः व्यासदेवः विविधरसानां वर्णने सदा सचेष्टः आसीत्। वस्तुतः रसः काव्यस्यात्मा। काव्यस्य विविधस्थाने साधुतया रससंयोगेन काव्यम् अतिरमणीयम् आह्लादजनकञ्च भवति। पुराणे अस्मिन् विविधसमये विविधाख्याने सुनिपुणभावेन रसानां परिवेषणं कृतम्। यथा हर-पार्वत्योः प्रेमवर्णनायां शृङ्गाररसस्य, सतीदेहत्यागे करुणरसस्य, महादेवस्य क्रोधे रौद्ररसस्य, शरभ-वराहयोः संग्रामे वीररसस्य शरभस्य रूपवर्णनापरिसरे अद्भुतरसस्य वर्णनं परिलक्षितम्। अनेन कविना रसानां यथायथप्रयोगेन पुराणमिदं सौन्दर्यमण्डितं कृतम्।

**सन्दर्भग्रन्थसूची**

1. आचार्य, रामानन्द, सम्पादक । *काव्यप्रकाश* । कलिकाता: संस्कृत पुस्तक भाण्डार, १९९८।
2. तर्करत्न, आचार्य पञ्चानन, सम्पादक। *कालिकापुराण* । कोलकाता नवभारत पावलिशार्स, अग्राहायण १४१९।
3. द्विवेदी, रेवाप्रसाद, सम्पादक । *कुमारसम्भव* । वाराणसी सम्पूर्णानन्द-संस्कृतविश्वविद्यलय, २००४।
4. त्रिपाठी, मृत्युञ्जय, सम्पादक। *कालिकापुराण* । वाराणसीः नवशक्तिप्रकाशन, २००६।
5. त्रिपाठी, जयङ्करलाल, सम्पादक । *मृच्छकटिक* । वाराणसीः कृष्णदास संस्कृत सीरीज, २००२।
6. शास्त्री, वैद्यनाथझा, सम्पादक । *मेघदूत* । वाराणसीः कृष्णदास अकादेमी, २००२।
7. शास्त्री, मधुसूदन, सम्पादक । *नाट्यशास्त्र(प्रथमभाग)* । वाराणसी: काशी हिन्दु विश्वविद्यालय, १९७१।
8. शास्त्री, शालिग्राम, सम्पादक । *साहित्यदर्पण* । दिल्ली चौखम्बा संस्कृत संस्थान, १९७२।

---

35 का.पु. ४०/८४
36 का.पु. ४०/१०७
37 सा.द. ३/२४२-२४५
38 का.पु. ३०/४४
39 का.पु. ३०/४७